# भद्राचल राम मङ्गलम्

रामचन्द्राय जनकराजजा मनोहराय
मामकाभीष्टदाय महित मङ्गलम् ॥

कोसलेन्द्राय मन्दहास दास पोषणाय
वासवादि विनुत सर्वदाय मङ्गलम् ॥ १॥

चारुकुंकुमोपेत चन्दनादि चर्चिताय
हार कटक शोभिताय भूरि मङ्गलम् ॥ २॥

ललित रत्न कुण्डलाय तुलसी वनमालिकाय
जलज सदृश देहाय चारु मङ्गलम् ॥ ३॥

देवकी सुपुत्राय देवदेवोत्तमाय
चावजात गुरुवराय भव्य मङ्गलम् ॥ ४॥

पुण्डरीकाक्षाय पूर्णचन्द्राननाय
अण्डजात वाहनाय अतुल मङ्गलम् ॥ ५॥

विमल रूपाय विविध वेदान्तवेद्याय
सुमुख चित्त कामिताय शुभद मङ्गलम् ॥ ६॥

रामदासाय मृदुल हृदय कमल वासाय
स्वामि भद्रगिरिवराय सर्वमङ्गलम् ॥ ७॥

इति श्रीभद्राचल राम मङ्गलम् ।